# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ६ | गुणाः – ५० |
| विषयः – सर्वदर्शनम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – भगवद्गीता (द्वितीयोऽध्यायः) | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।।

२ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्।।

३ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।।

**प्रश्नः २ स्वजनान् दृष्ट्वा अर्जुनस्य विषादं वर्णयत।**

**प्रश्नः ३ आत्मनः नित्यत्वम् उपपादयत।**

**प्रश्नः ४ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।

२ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।

३ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना।।

**प्रश्नः ५ क्षत्रियस्य प्रधानकर्मत्वेन युद्धं विशदयत।**

**प्रश्नः ६ मुक्तिसाधनानि गीतोक्तदिशा लिखत।**

**प्रश्नः ७ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते।।

२ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।

३ योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।

**प्रश्नः ८ स्थितप्रज्ञस्य लक्षणानि यथाभाष्यम् उपपादयत।**

**प्रश्नः ९ द्वितीयाध्यायस्य सारांशं लिखत।**

**प्रश्नः १० अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत।**

१ द्वितीयाध्यायस्य नाम किम्?
२ धनञ्जयः कः?
३ मधूसूदनः कः?
४ गुरुन् अहत्वा कः भैक्ष्यं श्रेयः मन्यते?
५ के न अनुशोचन्ति?
६ कः अमृतत्वाय कल्पते?
७ शरीरस्य हन्यमानेऽपि कः न हन्यते?
८ अव्यवसायिनां बुद्धयः कीदृश्यः भवन्ति?
९ त्रैगुण्यविषयाः के सन्ति?
१० कर्मसु कौशलं किम् उच्यते?
११ वीतरागभयक्रोधः स्थितधीः किम् उच्यते?
१२ कामात् किम् अभिजायते?
१३ सम्मोहात् किं भवति?
१४ कः शान्तिम् अधिगच्छति?
१५ भगवद्गीतायां कति अध्यायाः सन्ति?

****